विशेषवद्धूमरहितमिदं चन्दनप्रभववह्निरहितत्वात् निर्धूमोऽयमार्द्रेन्धनप्रभववह्निरहितत्वादित्यादावपि विशेषाभावेन कार्य्यविशेषानुमानं न स्यात् वह्निरहितत्वादिकञ्चोपाधिर्भवेत् व्यतिरेकिण्यष्टद्रव्यातिरिक्तद्रव्यानाश्रितत्वं हेत्वभावव्याप्यं न स्यात् द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात् स्वमध्ये गन्धस्यैव व्यञ्जकत्वादित्यादौ त्वयाप्यसिद्धिवारकविशेषणस्वीकारात्। अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात् तथा च स्थापनानुमाने उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यता धूमेनार्द्रेन्धनप्रभववह्निर्घटत्वेन शरीरजन्यत्वमपि नानुमीयेत। यत्तु जन्यानन्योन्याभावापेक्षया शरीरजन्यानन्योन्याभावस्याल्पत्वात्तेषामेव व्याप्यत्वमिति विपरीतमेव लाघवमिति तन्न विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात् स्नेहे शीतस्पर्शवत्त्वजलत्वयोर्गन्धाभावेऽपृथिवीत्वपृथिवीत्वाभावयोरिव। अन्यथा नीलधूमस्यैव व्याप्यत्वे धूममात्रस्याव्याप्यत्वप्रसङ्गः किञ्च त्वन्मये बह्वन्योन्याभावापेक्षया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यात् एकत्वात् प्रमेयत्वाद्यनन्तधर्मविशिष्टे व्याप्तावपि प्रयोजनाभावान्नानुमाने तदुपन्यासः। अथ लाघवेन जन्यत्वस्य शीघ्रोपस्थितिकतया जन्यत्वाभावत्वेन शीघ्रं व्याप्तिग्रहः न तु शरीरजन्यत्वाभावत्वेन विलम्बितप्रतीतिकत्वात्। यत्र विशेषणविशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेन्न एवं सति उत्पत्तिमत्त्वे सति सत्त्वादिकमनित्यत्वं सकर्तृकत्वव्याप्यतया न निर्गृह्येत शीघ्रोपस्थितिकतया घटत्वादेरेव तथात्वात्। यदि च सामान्यविशेषभावाद्विरोधाभावेन नोभयस्यापि व्याप्यत्वं तदा शरीराजन्यत्वजन्यत्वाभावयोरपि तुल्यम्॥ किञ्च शरीरं जन्यत्वं विशिंषद्भावमपि विशिनष्टि न तु साक्षात्, तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न व्यर्थविशेषणता। न चात्र विशिष्टाभावो विशेष्याभाव एव क्षित्यादावजन्यतापत्तेः। अतएव स्थापनायां शरीरजन्यत्वमुपाधिः साध्याभावव्याप्याभावप्रतियोगित्वेन साध्यव्यापकत्वनियमात्। व्यर्थविशेषणेऽधिकं निग्रहस्थानमिति चेन्न हेतुद्वयोपन्यासे ह्यधिकम्। अत्र तु विशिष्टमेव हेतुरिति विरुद्धस्थल उक्तमिति।

उच्यते। नीलधूमादौ व्याप्तिरस्त्येव अन्यथा विशेषाणामव्याप्यत्वे निराश्रया व्याप्तिः स्यात् नीलत्वमपि न व्याप्यतावच्छेदकं गौरवात् किन्तु धूमत्वमेव दण्डत्वेन कारणत्वे रूपमिव धूमत्वञ्च न नीलिम्नि किन्तु तदाश्रये धूमे इति न नीलधूमस्य हेतुत्वम् नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम्, उपलक्षणत्वे च धूमत्वमिति। किञ्च। व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा। नचैवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वात् नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात् अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यं तदभावेऽपि नीलधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वसम्भवादितिदिक्॥ एवञ्च शरीराजन्यत्वेऽपि न शरीरमवच्छेदकं गौरवात् येन विशेषेण विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात्। अतएव गन्धस्यैव व्यञ्जकत्वादित्यत्राप्रसिद्धेन गन्धादिषु मध्ये इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते इत्यसिद्धिवारकं विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्य्याभावप्रयोजकतया व्याप्यत्वनिश्चयः व्यापके च न व्यर्थविशेषणता विशिष्टस्य कारणत्वेन व्यापकत्वात् विशेषव्यतिरेकिस्थले विपक्षबाधकेनानन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वाभावव्याप्यत्वं यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न, यथा सकर्तृकत्वे। नापि शरीरजन्यत्वाभावोऽखण्डो हेतुः यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात् तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात् न चैवम्, जन्यत्वं लाघवात्तथा। तथा चाजन्यत्वमेवोपाधिः साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् सकर्तृकत्वशरीरजन्यत्वयोर्व्याप्यव्यभावेन तदभावयोरपि व्याप्यव्यभाव इति व्याप्यत्वासिद्धत्वाच्च। अतएव शरीरजन्यत्वाभावस्याकर्तृकत्वव्याप्यत्वात् तदभावयोरपि व्याप्यव्यापकभाव इति निरस्तम् शरीरजन्यत्वस्य सकर्तृकताऽप्रयोजकत्वात् न चाजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः सत्प्रतिपक्षोच्छेदप्रसङ्गादिति वाच्यं स्थापनायां यत्राभासत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधिकत्वात् यथा शब्दोऽनित्योगुणत्वादित्यत्र शब्दोनित्यो व्योमैकगुणत्वादित्यादिना सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः जलपरमाणुरूपे साध्याव्यापकत्वात्। नचैवमनैकान्तिकत्वमेव तदोद्भाव्यं सत्प्रतिपक्षमुपेक्ष्य तस्योद्भावानर्हत्वात्। किञ्च प्रागभावप्रतियोगित्वे सति समवेतत्वस्य तत्प्रतियोगिन्ये सति